**Journal of Veda Saṃskṛta Academy**
ISSN 2250-1711
Volume: XVIII; July to December 2021

# 'कुरुभुङ्क्ष्व' - तत्ववाद-भगवद्गीतयोःकर्मजिज्ञासा[1]

*'kuru bhuṅkṣva' - tatvavāda-bhagavadgītayoḥkarmajijñāsā*
'reap thy action' - Karma theory in Tatvavada and Bhagavadgita

गौतम् आर्[2]; श्रीनिवास वरखेडी[3]; श्रीनिवास कुमार् एन् आचार्य[4]

Contents

विषयसारांशः ........................................ 2
कर्म-ज्ञान-भक्त्यादीनि मोक्षसाधनानि ........................................ 2
आनन्दगीतानि द्वादशस्तोत्राणि ........................................ 3
कर्मलक्षणम् प्रभेदश्च ........................................ 4
कर्मणः कर्तव्यत्वम् ........................................ 4
पूर्वपक्षसिद्धान्तौ ........................................ 5
महाभारतादिसंवादः ........................................ 7
ज्ञानिनां कर्मकरणे प्रयोजनम् ........................................ 8
जनसेवा हि जनार्दनसेवा ........................................ 9
निगमनम् ........................................ 9
References ........................................ 10

[1]*This research paper article is a research outcome of the study of Karma in Tatvavada and Bhagavadgita as part of the ongoing project MAHE Mahabharata Subject Indexing being conducted by the Department of Philosophy (DoP), Manipal Academy of Higher Education (MAHE); see – www.mahabharata.manipal.edu.*
[2] Gowtham R [first author], Research Coordinator, DoP, MAHE, Manipal (e: gow.gowthamr@gmail.com)
[3] Shrinivasa Varakhedi [second author], Vice Chancellor, Central Sanskrit University, New Delhi (e: shrivara@gmail.com)
[4] Srinivasa Kumar N Acharya [corresponding author], Assistant Professor and Coordinator, DoP, MAHE, Manipal (e: acharya.srinivasan@manipal.edu)

## विषयसारांशः

“कुर्वन्नेवेह कर्माणि...” इति याज्ञीयमन्त्रोपनिषत् कर्मकरणेनैव मुक्तिरित्यभिप्रैति। तदुक्तं कृष्णगीतायां “न च सन्यसनादेव सिद्धिं समधिगच्छाति।” परन्तु क्वचित्कर्म तु संसारिणां, ज्ञानं तु यतीनामिति। “आरुरुक्षोर्मुनेर्योगम्” इत्यस्य व्याख्यावसरे ज्ञानिनां तु कर्मनिवृत्तिरिति निरूप्यते। वस्तुतः तत्ववाददर्शनाचार्यः मध्वाचार्यस्तु नैते कर्म, ज्ञानं, भक्तिश्च पृथक् पन्थान इति। अपिच ज्ञानिनामपि कर्मणः कर्तव्यत्वम् निरूपितम् तन्मते। एतस्मिन् विषये, मध्वकृतभक्तिसाहित्यस्य ‘आनन्दगीतायाः – द्वादशस्तोत्रस्य’ (हरिस्तुतेः) ‘कुरु भुङ्क्ष्व’ इत्यादिनः वीक्षा शोधपत्रेऽस्मिन् चर्च्यते।

मुख्यशब्दाः -द्वादशस्तोत्रम्, तत्ववादः,द्वैतमतम्, वेदान्तः, महाभारतम्, मोक्षसाधनम्, कर्म, भक्तिसाहित्यम्, जनसेवा

# ‘कुरुभुङ्क्ष्व’ - तत्ववाद-भगवद्गीतयोः कर्मजिज्ञासा

## कर्म-ज्ञान-भक्त्यादीनि मोक्षसाधनानि

भारतदेशेऽस्मिन् विद्यमानायां विविधदार्शनिकपरम्परायां चतुर्विधपुमर्थेषु अनिष्ट-निवृत्तिरूपं इष्ट-प्राप्तिरूपं वा अन्यत्स्वरूपं मोक्षमेव दर्शनस्य तत्प्रतिपादितस्य तत्वज्ञानस्य प्रयोजनत्वेनाङ्गीक्रियते। विशेषतः वेदान्तदर्शने बन्धापगमे मोक्षोपगमे च कर्म-ज्ञान-भक्त्यादीनि साधननानीत्यङ्गीकृतानि। तत्र श्रुत्यादिसदागम उपाश्रितः।

तदस्मिञ्श्वेताश्वतरोपनिषदेवं वदति - “तमेवं विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय”[5]इति। वाक्येऽस्मिन् ‘विदित्वा’इत्युक्ते ‘ज्ञात्वा’इत्यर्थः। अत्र विदित्वा शब्दगर्भितस्य ज्ञानस्य परोक्षज्ञानं नाम ‘विद्या’ इत्यर्थः। तेन विद्यैव तादृशमोक्षस्यावाप्तेः साधनमित्युक्तं भवति। तत्तु ब्रह्मसूत्रेऽपि निरूपितम्। “विद्यैव तु निर्धारणात्”[6] इति बादरायणोक्ते ब्रह्मसूत्रे परोक्षज्ञानमेव मोक्षं प्रति कारणमित्युपपादितम्[7]; श्वेताश्वतरोपनिषदुक्तेश्च। परन्तु न केवलं वेदादिजन्यं परोक्षज्ञानं

---

[5]श्वेताश्वतरोपनिषत् 3.8

[6]वेदव्यासस्य ब्रह्मसूत्राणि 3.3.23.48 विद्याधिकरणम्

[7]मध्वाचार्यस्य ब्रह्मसूत्रभाष्यम् 3.3.23.48 विद्याधिकरणम्

मोक्षसाधनम्। तदनुरेव “दर्शनाच्च”[8] इति सूत्रेऽस्मिन् ‘अपरोक्षज्ञानाच्च’ मोक्ष इति स्पष्टीकृतम्। तादृशापरोक्षज्ञानार्थं साधनानि कानीत्युक्ते, ब्रह्मसूत्रानुसारेण मध्वाचार्यस्य ब्रह्मसूत्रभाष्यस्यानुबन्धाधिकरणे साधनानि निरूपितानि[9]। तत्र प्रधानं साधनं हरिभक्तिरिति निरूपितम्। “न केवलं श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनम्। किन्तु? भक्त्यादिभिश्च” इत्यादि।

हरिभक्त्यर्थं, हरेर्माहात्म्यज्ञानं सम्पादनीयम्। यथाहि तत्ववादप्रतिपादकेन आचार्यमध्व इति नाम्ना प्रथितेन आनन्दतीर्थभगवत्पादेन स्वग्रन्थे महाभारत-तात्पर्यनिर्णये भक्तिलक्षणमेवमुक्तम् “माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तः...॥”[10] तथा च भक्तिः माहात्म्यज्ञानपूर्विका इति ज्ञायते। तद्धरेर्माहात्म्यज्ञानं तावच्छास्त्राद्यध्ययनेन कर्मणा लभ्यते। परन्तु शास्त्राध्ययनं न सर्वेषां सुकरमिति - शास्त्राध्ययनात्दूरेस्थितानामपि मोक्षार्थं वेदान्तविचाराणां सुबोधयन्ति सरळरूपाणि भक्तिप्रचुराणि गीतानि दार्शनिकाचार्याः शङ्कररामानुजमध्वादयः व्यरचयन्।

## आनन्दगीतानि द्वादशस्तोत्राणि

तत्र माध्वीयं विशिष्टा काचित् गीततततिःमध्वाचार्यरचिता भक्तिप्रधाना सुप्रसिद्धा, बहुभिः जनसामान्यैरपि नित्यं गेया। सा द्वादशस्तोत्रमित्येव प्रसिद्धा ‘आनन्दगीता’। विभिन्नेषु स्थलेषु प्रसङ्गेषु मार्गेषु मध्वकृतानि द्वादशस्तोत्राण्यध्यायत्वेन सङ्गृह्य द्वादशस्तोत्रमिति गीयते। विदुषा बन्नञ्जेगोविन्दाचार्येण मध्वाचार्यस्य साक्षाच्छिष्यस्य हृषीकेशतीर्थस्य सर्वमूलकोशगतपाठानुसारेणैतानि स्तोत्राणि नाध्यायरूपाणीति परिगृह्यते। यथा मूलकोशे निर्दिष्टं, तथाऽस्य ‘हरिस्तुतिः’ इति नाम्ना स्तोत्रमिदं प्रत्येकमित्येव तेन निरूप्यते। तच्च, यत्सामान्यतया सर्वैः माध्वैः श्लोकनवकात्मकं हर्यष्टकमिति प्रथितं तृतीयाध्यायं, श्लोकनवकात्मकं हरिस्तवनं चतुर्थाध्यायं च समाहृत्य - हरिस्तुतिरिति “कुरु भुङ्क्ष...” इत्यादि पञ्चदशश्लोकात्मकं पञ्चमं स्तोत्रमिति मूलकोशे पठ्यते। तत्र स्तोत्रक्रमव्यत्यासोऽपिवर्तत इति।[11]

---

[8]वेदव्यासस्य ब्रह्मसूत्राणि 3.3.23.49 विद्याधिकरणम्

[9]वेदव्यासस्य ब्रह्मसूत्राणि 3.3.23.51अनुबन्धाधिकरणम्

[10]माहे महाभारतम् - मध्वाचार्यस्यमहाभारततात्पर्यनिर्णयम् 1.85

[11]आनन्दतीर्थर भक्तिगीतेगळु – उपोद्घातः

## कर्मलक्षणम् प्रभेदश्च

मध्वकृतेषु द्वादशस्तोत्रेषु, विशिष्य गीतेऽस्मिन् कर्म, ज्ञानं, प्रधानतया भक्तिश्च प्रतिपाद्यन्ते। अपि चात्र तत्ववादस्य समग्राण्यपि तत्वानि भगवत्पारम्य-तज्ज्ञान-तद्भक्ति-तत्सेवादिकर्माणि युक्तियुक्तानि प्रतिपादितानि। तत्र तावत्कर्मणः विषये केचन प्रश्ना उद्भाव्यन्ते – किं कर्म? कर्म कर्तव्यम्वा, न वा? किं कर्म कर्तव्यम्, किं न कर्तव्यम्? इत्यादि। "यत्क्रियते तत्। इति प्रसिद्धम्" इति कर्मणः सामान्यस्वरूपमुक्तं शब्दकल्पद्रुमे[12]। वेदगर्भपद्मनाभसूरिणः पदार्थसङ्ग्रहे "साक्षात्परम्परया वा पुण्यपापासाधारणकारणं कर्म"[13] इति कर्मसामान्यलक्षणं निरूपितम्। काचन क्रिया पुण्यं प्रति वा, पापं प्रति वा कारणं भवत्येव। सा क्रिया कर्म इत्यभिधीयते।

कृष्णस्तु भगवद्गीतायां "नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।"[14] इति कश्चिदपि पुरुषः[15] नाम जीवःकर्म अकृत्वा स्थातुं न शक्नोत्येव इति न्यरूरुपत्। तस्मात्सर्वे सर्वदा कर्म कुर्वन्त एव भवन्ति। तत्र यत्साधुकर्म तद्विहितकर्म पुण्यप्रदमिति, यदविहितं वा निषिद्धं कर्म तत्पापप्रदम्। तत्कथं ज्ञायते विहितत्वमविहितत्वं कर्मणामिति चेत्, कृष्ण एव भगवद्गीतायामाह - शास्त्रमेवाभिदधाति एतत्कर्म साधु विहितमिति – "तस्माच्छास्त्रं प्रमाणं ते...॥"[16] तस्मादेव पदार्थसङ्ग्रहकारः कर्मप्रभेदमाह "विहित-निषिद्ध-उदासीनभेदेन त्रिविधं कर्म"[17] इति।

## कर्मणः कर्तव्यत्वम्

सर्वैरपि जीवैः यत्किमपि फलकारणीभूतं कर्म क्रियत एव। परन्तु सर्वेषां कर्मणामपरोक्षज्ञानं प्रति न कारणत्वम्। ईशावास्योपनिषदा च ज्ञायते - "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥"[18] इति। कर्माणि कुर्वन्नेव जिजीविषेत्, अन्यथा बन्धात् मुक्तेः उपायः नास्ति। एवं कृते तु लेपः न भवति। अत्र

---

[12]शब्दकल्पद्रुमः

[13]वेदगर्भपद्मनाभसूरिणः मध्वसिद्धान्तसारः - कर्मप्रकरणम्

[14]माहे महाभारतम् - भगवद्गीता 3.5

[15]पुरुषपदमत्र न लिङ्गवाची, किन्तु जीवात्मवाची।

[16]माहे महाभारतम् - भगवद्गीता16.24

[17]वेदगर्भपद्मनाभसूरिणः पदार्थसङ्ग्रहः - कर्मप्रकरणम्

[18]ईशावस्योपनिषत् 2

“अकुर्वतः कर्म न लिप्यते इति नास्ति”[19] इति शेषपूरणं मध्वभाष्येनावगम्यते। तेन यत्कर्मकरणेन कर्मलेपः – पापलेपः न भवति, तादृशं स्वोचितं कर्मफलासक्त्या कर्म कर्तव्यम्; तदपरोक्षज्ञानय कारणीभवति। कियत्कालपर्यन्तं कर्तव्यम् कर्म इत्यस्य उत्तरं तु शतं समा नाम वर्षशतं – मरणपर्यन्तं कर्तव्यम् इति[20]। तादृशस्य कर्मकरणस्य प्रयोजनं तावत्, अन्तःकरणशुद्धिद्वारा अपरोक्षज्ञानावाप्तिः, तेन च मोक्षप्राप्तिः भवति। तदेवोक्तं मध्वाचार्येण द्वादशस्तोत्रे “कुरु भुङ्क्ष्व च कर्म निजं नियतम्” ततः “सुखरूपममुष्य पदं परमं स्मरतस्तु भविष्यति तत् सततम्”[21] इति।

## पूर्वपक्षसिद्धान्तौ

नन्वादिशङ्करभगवत्पादेन भगवद्गीताभाष्ये तृतीयाध्याये “साङ्ख्यानां पृथक्करणात् अज्ञानामेव हि कर्मयोगः। न ज्ञानिनाम्। ज्ञानिनां तु, गुणैरचाल्यमानानां स्वतः चलनाभावात्, कर्मयोगो नोपपद्यते।”[22] इति ज्ञानिनां कर्म एव नास्ति। तेषां तु कर्मनिवृत्तिरेव। तदेवाह मधुसूदनसरस्वतिरपि। परन्तु जयतीर्थः “न ह्यत्र ज्ञानस्यावश्यकत्वे किञ्चिदुच्यते। नापि यज्ञादिकर्माकरणस्य असम्भवोऽभिधीयते येन प्रकृतसङ्गतिः स्यात् किन्तु शरीरयात्राद्यर्थानां कर्मणामपरिहार्यत्वम्। अतो नेदं व्याख्यानं। अपि तर्हि ‘कर्मणा बध्यते जन्तुः’[23]” इत्येवं सर्वस्य जन्तोः ज्ञानिन अज्ञानिनश्च कर्मबन्ध्यत्वं दर्शयित्वा, गीतायाः श्लोकेऽस्मिन् ज्ञानिने तदन्याय चाकर्मकृत्त्वं नास्तीत्युच्यत इति निरूपितम्। इदमेवोपपादितं श्रीधरस्वामिनाऽपि स्वभाष्ये – “जातु कस्याञ्चिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञानी वाऽज्ञो वा अकर्मकृत् कर्माण्यकुर्वाणो न तिष्ठति।”[24]

नन्वपरत्र भगवता कृष्णेनैव ज्ञानिनामपरोक्षज्ञानावाप्तेः कर्मणः कारणत्वमुपात्तम्। परन्त्वपरोक्षज्ञानानन्तरं कर्मनिवृत्तिः साधनमिति गीताभाष्ये शङ्कराचार्येन निरूप्यते। “आरुरुक्षोः आरोढुमिच्छतः अनारूढस्य ध्यानयोगे अवस्थातुमशक्तस्यैवेत्यर्थः। कस्य तस्य आरुरुक्षोः मुनेः कर्मफलसंन्यासिन इत्यर्थः। किमारुरुक्षोः योगम्। कर्म कारणं

---

[19] मध्वाचार्यस्यईशावस्योपनिषद्भाष्यम् 2

[20]जयतीर्थस्य ईशावास्योपनिषद्भाष्यटीका 2

[21]मध्वाचार्यस्यद्वादशस्तोत्रम् 3/4

[22]शङ्कराचार्यस्य भगवद्गीताभाष्यम् 3.5

[23]माहे महाभारतम्12.233.7

[24]श्रीधरस्वामिनः भगवद्गीताभाष्यम् 3.5

साधनम् उच्यते। योगारूढस्य पुनः तस्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनम् उच्यते इत्यर्थः।"[25]

तदेवोक्तं रामानुजाचार्येणापि "योगम् आत्मावलोकनं प्राप्तुम् इच्छोः मुमुक्षोः कर्मयोग एव कारणम् उच्यते तस्य एव योगारूढस्य प्रतिष्ठितयोगस्य एव शमः कर्मनिवृत्तिः कारणम् उच्यते। यावदात्मावलोकनरूपमोक्षप्राप्तिः तावत्कर्म कार्यम् इत्यर्थः।"[26] आनन्दगिरिरपि "सर्वव्यापारोपरम-रूपोपशमस्य योगारूढत्वे कारणत्वं विवृणोति"[27] इत्याह।

परन्तु "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते॥"[28] इत्यत्र नापरोक्षज्ञानिनां सर्वव्यापारोपरम उक्तं युक्तम्। अपरोक्षज्ञानावाप्त्यनन्तरं कर्मनिवृत्तिरित्यस्य गीतायामेव वक्ष्यमाणवचनैर्विरोधो दृश्यते। यथाहि गीतायां तृतीयाध्याये "कर्मणैव हि संसिद्धिमास्थिता..." इत्यारभ्य "सक्ताः कर्मण्यविद्वांसो..." इति श्लोकषट्केषु जनकादयः कर्मयोगिनोऽपि दिव्यचेतांसि नियतकर्मकरणेनैव संसिद्धिमास्थिता इत्युपपादितम्। स्वयं कृष्णोऽप्यस्मिन् तृतीयाध्याये कर्मयोगे 'यद्यहं न वर्तेयं कर्मणि, मनुष्याः सर्वे मम वर्त्मानुवर्तन्ते, तेऽपि कर्म न कुर्युः, उपहन्यां तान्, सङ्करो भवेयम्' इत्युक्त्वा, 'विद्वानपि सततं कर्म कुर्यात् – लोकसङ्ग्रहं चिकीर्षुः। बुद्धिभेदमपि न जनयेत्, किन्तु सर्वकर्माणि युक्तः स्थितप्रज्ञः समाचरन् जोषयेत्' इति समुदजूघुषत्। नतु कर्मफलासक्त्या, किन्तु "असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः" इति।[29]

तस्मादाह वेदान्तदर्शनाचार्यः मध्वाचार्य इति प्रथित आनन्दतीर्थः –"आरुरुक्षोः उपायसम्पूर्तिमिच्छोः, योगारूढस्य सम्पूर्णोपायस्य च अपरोक्षज्ञानिनः योगं कर्म परमसुखस्य समाध्यादिफलकारणम्"। उभययोरपि "कर्म ज्यायो ह्यकर्मणः"। यथाहि "ये त्वां पश्यन्ति भगवंस्त एव सुखिनः परम्। तेषामेव तु सम्यक्क समाधिर्जायते नृणाम्। भोक्तव्यकर्मण्यक्षीणे जपेन कथयाऽपि वा। वर्तयन्ति महात्मानस्त्वद्भक्तास्त्वत्परायणाः"[30] इत्यादौ भाष्योदाहरणे -

---

[25]शङ्कराचार्यस्य भगवद्गीताभाष्यम् 6.3

[26]रामानुजाचार्यस्य भगवद्गीताभाष्यम् 6.3

[27]आनन्दगिरेः भगवद्गीताभाष्यम् 6.3

[28]माहे महाभारतम् - भगवद्गीता 6.3

[29]माहे महाभारतम् - भगवद्गीता 3.19-26

[30]मध्वाचार्यस्य भगवद्गीताभाष्यम् 6.3

महात्मानः अपरोक्षज्ञानिनः समाधावपि भगवत्परायणाः तन्नामजपया तत्कथया वा वर्तन्ते सर्वदा इत्युक्तम्।

श्रीधरभाष्यमपि संवदत्येतत् "ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः तदारोहे कारणं कर्मोच्यते, चित्तशुद्धिकरत्वात्। ज्ञानयोगमारूढस्य तु तस्यैव ज्ञाननिष्ठस्य शमः समाधिश्चित्तविक्षेपकर्मोपरमो ज्ञानपरिपाके कारणमुच्यते।"[31] अत्र तु चित्तविक्षेपकर्मणः उपरमः पक्के ज्ञाने भवतीति। 'नतु सर्वस्य कर्मणः'।

अत एव "आरुरुक्षोर्मुनेर्योगं" इत्यस्मिन्श्लोके शम इत्युक्ते कर्मनिवृत्तिरिति न, समाधिरित्यर्थः साधुर्भवति – "शमो मन्निष्ठता बुद्धिः, दम इन्द्रियनिग्रहः।[32]" शमस्य भगवति बुद्धिरिति भागवते। तेनकर्मकरणं तु साधारणं, तत्रारुरुक्षोर्यौगिकं कर्म, योगारूढस्य समाधिः कारणमिति मध्वाचार्यस्य समाधानं, साधुदृश्यते। तदेव द्वादश-स्तोत्रस्य आद्यपद्ये 'सततम्' इत्यनेन सूचितम्।

इदं स्पष्टं हरिस्तुतौ श्लोकाष्टमे दशमे च –"चतुराननपूर्वविमुक्तगणा हरिमेत्य तु पूर्ववदेव सदा।" 'विमलैः श्रुतिशाणनिशाततमैः सुमनोऽसिभिराशु बलिनं निजवैरिणं निहत्य, आत्मतमोभिदमीशमनन्तं हरिं दृढमुपेत।' अनुश्लोकेऽपि "स्वधिया प्रणतान् स अवति"[33] इति तत्फलमपि।

## महाभारतादिसंवादः

तस्मादेव गाङ्गेयः शान्तनवः सन्त्रस्स्तो शरशय्यां स्थितस्सन्, भगवति मनः, तुष्टाव "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः। यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा"[34] इति सर्वदा उपायसम्पूर्तिमिच्छुः सम्पूर्णोपायश्च तमुपेतेति। अपि चान्यत्र भीष्मः स्तौति - "सोऽयंनारायणः श्रीमान् दीप्त्या परमया युतः। व्रतं यथावत् तच्चीर्त्वा द्वारकां पुनरागमत्॥[35] …अनादिनिधनोऽव्यक्तो महात्मा मधुसूदनः। अयं जातो महातेजाः सुराणामर्थसिद्धये॥"[36] अत्रोभयत्रापि कृष्णस्य

---

[31]श्रीधरस्वामिनः भगवद्गीताभाष्यम् 6.3

[32]वेदव्यासस्य भागवतपुराणम् 11.19.36

[33]मध्वाचार्यस्यद्वादशस्तोत्रम् 3/4

[34]माहे महाभारतम् - अनुशासनपर्व 135.8

[35]माहे महाभारतम् - अनुशासनपर्व 252.19

[36]माहे महाभारतम् - अनुशासनपर्व 252.25

गीताप्रतिज्ञार्थः दृश्यते - भगवान् नारायणः व्रतानि करोति, अनादिरपि सुराणामर्थसिद्धये जातः। यथाहि "धर्मसंस्थापनार्थाय सम्भवामि पुनः पुनः"। कुत एवं? 'नमे किमपि कर्तव्यमस्ति। न अनवाप्तं वा अवाप्तव्यं, कर्मणि वर्ते एव।'[37] "यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥[38]" इति उपायसम्पूर्तिमिच्छोः सम्पूर्णोपायस्य च मुक्तये लोकस्य सङ्ग्रहार्थम् वा कर्मणः कर्तव्यत्वं सेत्स्यति। तदस्य संवादित्वं उद्धवगीतादिषु भागवते च दरीदृश्यते। तदेवोक्तं गीतायां "सर्वं कर्माखिलं ज्ञाने परिसमाप्यते।" एवं भगवद्गीता-महाभारतादिषु बहुषु स्थलेषु कर्मयोगस्य सातत्यं समर्थितम्।

## ज्ञानिनां कर्मकरणे प्रयोजनम्

वस्तुतस्तु, "प्रयोजनं संप्रवृत्तेः कारणं फललक्षणम्। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते॥[39]" इत्यपरोक्षज्ञानस्य प्राप्त्यनन्तरं किमपि प्रयोजनं नास्ति ज्ञानिनां, अतः किमर्थं कर्म योगारूढस्य? इति प्रश्नः स्वाभाविकः। तस्य समाधानं मध्वचार्यस्य ईशावास्योपनिषद्भाष्ये नारदीयवाक्योदाहरणेन दत्तं भवति। तथाहि- "अज्ञस्य कर्म लिप्येत कृष्णोपास्तिम् अकुर्वतः। ज्ञानिनोऽपि यतो ह्रासः आनन्दस्य भवेद्ध्रुवम्। अतोऽलेपोऽपिलेपः स्यादतःकार्यैव सा सदा॥ इति।"[40] इह लोके विद्यमानं सामान्यसुखम्, मुक्तावेव परमसुखम्। तस्य परमसुखस्य वृद्धि-ह्रासरूपं कर्मप्रयोजनं ज्ञानिनामस्त्येव। अत अपरोक्षज्ञानिनामपि कर्म करणीयमेव इति ज्ञायते।

यथोक्तं गीतायां शास्त्रविहितस्यैव कर्मणः कर्तव्यत्वम्। तदस्मिन् स्तोत्रस्याद्यपद्येऽनूदितम्। "निजं नियतं कर्म कुरु।" इति। तत्रोक्तं विहितकर्म एव कर्तव्यमिति नियतपदेनोक्तम्। यद्यत् 'नियतं' तत्सर्वं कर्तुमर्हति वा इति चोदिते, कष्टसाध्यमित्येवोत्तरम्। तदर्थं 'निजम्' इति स्वोचितं स्वभावानुसारं कर्म कुरु इत्युक्तम्। तदेव कृष्णः "नियतं कुरु कर्म त्वम्"[41] इति गीतायां समवदत्। तस्मात्स्वोचितं – निजं, विहितं – नियतं च कर्म सततं कुरु – तदर्थः कर्तव्यमिति ज्ञायते।

---

[37] माहे महाभारतम् - भगवद्गीता 3.22

[38] माहे महाभारतम् - भगवद्गीता 3.21

[39] शङ्कराचार्यस्यसर्ववेदान्तसिद्धान्तसारसंग्रहः11

[40] मध्वाचार्यस्यईशावस्योपनिषद्भाष्यम् 2

[41] माहे महाभारतम् - भगवद्गीता 3.8

## जनसेवा हि जनार्दनसेवा

किन्नाम विहितं कर्म? केवलं जपतपाद्यलौकिकं कर्म वा? नेत्याह मध्वाचार्यः। तदिदं मध्वस्य कृपापूर्णं लोकमुखं स्तोत्रेऽस्मिन्, आरुरुक्षोर्मुनेर्योगमिति गीताश्लोकस्य व्याख्यानावसरे गीतातात्पर्यनिर्णये च चकास्ति। "बहुचित्रजगद् बहुधाकरणात् परशक्तिरनन्तगुणः परमः", तादृशस्य भगवतः सृष्टिरिदं विश्वं, तस्मै विश्वाय लोकाय यत्कर्म क्रियते – "तत्कर्म हरितोषं यत्"। तस्य कर्मणः "यततोऽपि हरेः... सकलं हि अघमाशु लयं व्रजति" इति यततः अपि महत्फलमुच्यते।

तदेव गीतातात्पर्ये "नानाजनस्य शुश्रूषा कर्माख्या करवन्मितेः। योगार्थिना तु सा कार्या योगस्थेन...। तस्य प्राण्युपकारेण सन्तुष्टो भवतीश्वरः।" विविधाः जनाः समुदायाश्च जगति दृश्यन्ते, प्राणिनश्च। तदेतत् सर्वं जीवजातं भगवदधीनम् - "यदि नाम न तस्य वशे सकलं, कथमेव तु नित्यसुखं न भवेत्" इति युक्तिं गायति मध्वभगवत्पादः गीतेऽस्मिन्। तस्मादाह श्रीविश्वेशतीर्थः गीतासारोद्धारे –'न केवलं स्वाध्यायप्रवचनतपाद्यन्यत् कर्म, कर्माख्या नानाजनस्य शुश्रूषा, तदिदं योगस्थस्य सम्पूर्णोपायस्यापि कार्यम्, यथा करः (tax) समर्प्यते सर्वकाराय, तथा भगवतः सर्वकारेऽस्मिन् जन-प्राणि-विश्व-सेवा। तेन प्रीतो भवति केशवः।'[42]

## निगमनम्

विहितस्य स्वोचितस्य कर्मणः सम्यगनुष्ठाने किं प्रयोजनम्? ब्रह्मसूत्रभाष्यस्य भाक्ताधिकरणे श्रुतिरुदाहृता - "कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि यत एनममृतत्वं नयन्ति।"[43] तथा च कर्मफलम् ज्ञानलाभः। तत्वज्ञानान्मोक्षः इत्युपनिषत् – "विद्ययाऽमृतमश्नुते।"[44]

तथाऽपि न केवलं कर्मणा, नवा ज्ञानेन। किन्तु "भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन", "भक्तिमान् मे प्रियो" इति

---

[42]विश्वेशतीर्थस्य गीतासारोद्धारः pp. 140-142

[43]मध्वाचार्यस्य ब्रह्मसूत्रभाष्यम् 3.1.1.7 भाक्ताधिकरणम्

[44]ईशावस्योपनिषत्11

भगवद्गीतायां स्पष्टमुपात्तस्य, ब्रह्मसूत्रानुबन्धाधिकरणे च निबद्धानां मोक्षसाधनेषु भक्तिरेव परमसाधनमित्यभिप्रायेण स्तोत्रेऽस्मिन् मध्वाचार्यः 'निजं नियतं कर्म कुरु' 'फलं भुङ्क्ष्व'– "परन्तु हरिपादविनम्रधिया सततम्" कुरु इति।

अपि च "स्मरतस्तु विमुक्तिपदं परमं स्पुटमेष्यति" इत्यादिना स्पष्टीकृतं मुक्तिमेष्यति नवविधभक्तिं कुर्वाणेन। तदेव तन्त्रसारसङ्ग्रहेऽपि - "परमस्नेहसंयुक्तयथार्थज्ञानतो भवेत्। सा भक्तिरिति विज्ञेया साधनं भोगमोक्षयोः॥ मुख्यमेषैव नान्यत्स्यात् सर्वं व्यर्थं तया विना। सैकाऽप्यभीष्टफलदा मोक्षो दर्शनयुक्तया॥"[45], महाभारत-तात्पर्यनिर्णयेऽपि निदर्शितम् "तया मुक्तिर्न चान्यथा"।

तस्मात् भक्तिरेव वरीयसी, कर्म तु ज्ञानसम्पादनाय, नित्यानित्यवस्तुतत्वज्ञाने जाते, शमादिसम्पत्त्या, गीतोक्तरीत्या मध्वोक्तदिशा भगवत्यनन्यमनाः श्रवणादिभिः "सततं शास्त्रविमर्शेन भविष्यति साक्षात्कारः[46]", तत अत्युद्रिक्तया भक्त्या भगवत्प्रसादादनिष्टनिवृत्तिः स्वरूपानान्दस्येष्टस्याविर्भावलक्षणा मुक्तिर्भवतीति[47] मध्वाचार्यस्य वेदान्तमतं स्तोत्रे सरळं निरूपितम्।

एतदेव तत्ववादमतं मध्वाचार्यः भगवद्गीताभाष्यस्य उपोद्घातेऽपि - "भक्त्या प्रसन्नः परमो दद्यात् ज्ञानमनाकुलम्। भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत्। ततोऽपि भूयसीं भक्तिं दद्यात् ताभ्यां विमोचयेत्। मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः। साध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम्।"[48] तस्मादुच्यते, नैते कर्म, ज्ञानं, भक्तिश्च पृथक् पन्थानः इति। अपिच ज्ञानिनामपि कर्मनिवृत्तिः नास्ति। तथाच ते पन्थानः मिलित्वैवैकं फलं प्रापयन्ति – अनुसन्धाने विचारे, अनुष्ठाने आचारे च। यत्कर्म ज्ञानयुक्तया भक्त्या क्रियते, तत्कर्म मोक्षसाधनम्। तदेतस्मिन् मुक्तौ तु भक्तिः न वा कर्म साधनस्वरूपम्, किन्तु साध्यस्वरूपम्। इति तत्ववादमतम्।

## References

(Madhvacharya), Anandatirtha. 1969. "Bhagavadgitabhashya and Bhagavadgitatatparya." In Sarvamula Granthah - Prasthanatraya, by Anandatirtha (Madhvacharya), edited by Govindacharya Bannanje. Bengaluru: Akhila

[45]मध्वाचार्यस्य तन्त्रसारसङ्ग्रहः 4.158-159

[46]मध्वाचार्यस्य तन्त्रसारसङ्ग्रहः 4.158

[47]जयतीर्थस्य प्रमाणपद्धतिः (ग्रन्थसमाप्तिवाक्यम्)

[48]मध्वाचार्यस्य भगवद्गीता-तात्पर्यम् – उपोद्घातः

Bharata Madhva Maha Mandala.
—. 2006. Ishavasyopanishadbhashya. Edited by Vadirajacharya Karanam. Bengaluru: Vishva Madhva Maha Parishat - Uttaradi Matha.
(Madhvacharya), Anandatirtha. n.d. "Sankirnagrantha (Sarvamula granthagalu)." In Dvadasha Stotra, by Anandatirtha (Madhvacharya), edited by Ramavitthalacharya, translated by Ramavitthalacharya, 576-587. Bengaluru: Akhila Bharata Madhva Maha Mandala.
(Madhvacharya), Anandatirtha. 1974. "Sankirnagrantha 3 - Stotravibhaga (Dvadashastotrani)." In Sarvamulagranthah - Sankirnagranthas (Prakaranas, Acara Granthas and Stotras), by Anandatirtha (Madhvacharya), edited by Govindacharya Bannanje, 204-206; 227-229. Bengaluru: Akhila Bharata Madhva Maha Mandala.
Bannanje, Govindacharya. 1998. Anandatirthara Bhaktigitegalu. Bengaluru: Bhaktibharati Pratishthana.
—. 2000. Bhagavantana Nalnudi (Bhagavadgiteya Kannada Padinudi). Udupi-Bengaluru: Ishavasya Pratishthana.
—. 2016. "Ninna palina karma madu (Bannanje Govindacharya) - YouTube." YouTube. July 20. https://www.youtube.com/playlist?list=PLjXeT-FRKPGtl-mU-hO7TNT-PAcMQwnhs.
—. 2010. Tantrasarasangraha of Anandatirtha. Udupi-Bengaluru: Ishavasya Pratishthana.
2012. "Bhagavadgita in Kannada - ebook." Bhagavadgita Kannada Blogspot. January 27. https://sites.google.com/site/adhyatmainkannada/home/bhagavadgite/00-Bhagavad_Gita-V04.pdf?attredirects=0&d=1.
Department of Philosophy (DoP), MAHE. 2016-21. MAHE Mahabharata - Digital Concordance and Grammatical Analysis. 5. Edited by Srinivasa Kumar N Acharya. Comps. S R Arjuna, Gowtham R and Ananda teertha S. Manipal: Manipal Academy of Higher Education (MAHE). www.mahabharata.manipal.edu.
Jayatirtha, Anandatirtha, and Vedavyasa. 2015. Tatvaprakashika with Bhashya and Brahmasutra. Edited by Hayavadana K Puranika, Shankaranarayana K Adiga, C H Badarinathacharya, Veeranarayana Pandurangi and H P Nagarajacharya. Vol. III. Bengaluru: Purnaprajna Samshodhana Mandira.
n.d. Kosha Sanskrit Today (KST) Online Sanskrit Dictionary. https://kosha.sanskrit.today/word/sa/karmma?q=karma.
Krishnatatachar, K S. 1959. Gitartha Dipika. Mysuru: Varadarajayyangar, Srikanta Power Press.
Puranika, Hayavadana K, Haridasa A Bhatta, and K T Pandurangi, . 2008. Gitaprasthana (Sarvamulagranthagalu). Bengaluru: Akhila Bharata Madhva Maha Mandala.
1996. Srimad Bhagavadgita: Gita Supersite. Department of Computer Science and Engineering, Indian Institute of Technology, Kanpur. https://www.gitasupersite.iitk.ac.in/srimad?language=dv&field_chapter_value=1&field_nsutra_value=1&scsh=1&scram=1&scanand=1&scjaya=1&scmad=1&scval=1&scms=1&scsri=1&scvv=1.
Suri, Padmanabha, and Vedagarbha. 2009. Madhvasiddhantasara with Padarthasangraha. Edited by Ramacharya Malagi and S R Pandurangi. Bengaluru: Dvaita Vedanta Studies and Research Foundation.
Tirtha, Vishvesha. 1999. Gita Saroddhara. Udupi: Pejavara Adhokshaja Matha. http://www.dvaita.org/shaastra/gita/gita_sara/.
Upadhyaya, Sagri Raghavendra. n.d. Gitegondu Kadegolu. Udupi: Tatva Samshodhana Samsat.
Varakhedi, Shrinivasa. 2017. The Path of Proofs - Pramanapaddhati of Sri Jayatirtha. Manipal: Manipal University Press and Dvaita Philosophy Resource Centre.

**Contact Details,**

Gowtham R
Department of Philosophy
Floor VI, Advanced Research Centre,
Madhav Nagar, Manipal – 576104, Karnataka.
E: gow.gowthamr@gmail.com; M: +91-9738201115